AWADHARANA : **अवधारणा**
[ A Peer-Reviewed, Open Access Journal ]
ISSN : 2505-080x (Print)
Volume 7, September 2022
Published by Creative Democrat Academy

# पाणिनीयाष्टाध्यायय्यां प्रयुक्तानां पारिभाषिकसूत्राणां परिशीलनम्

**प्रकाश तिवारी**
**उपप्राध्यापक, बाल्मीकि विद्यापीठ, प्रदर्शनी मार्ग, काठमाडौं**

*Article History : Submitted 16 June 2022; Reviewed 20 July 2022; Accepted 15 Aug. 2022*
*Author: Prakash Tiwari     Email: p85tiwari@gmail.com*
*DOI: https://doi.org/10.3126/awadharana.v7i1.49379*

## सार

*व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यो विविच्य साधुत्वेन बोध्यन्ते शब्दा अनेनेति व्युत्पत्या वि-आङ्-उपसर्गपूर्वकात् करणार्थकडुकृञ्धातोः करणार्थकः ल्युट्प्रत्यययोगेन सिद्ध्यति व्याकरणशब्दः । साधुशब्दज्ञानमेव व्याकरणाध्ययनस्य मुख्यप्रयोजनमस्ति । पाणिनिना व्याकरणग्रन्थस्य पूर्णतायाः कृते अष्टाध्याय्यां सूत्रपाठः, धातुपाठः, गणपाठः (प्रातिपदिकपाठः), उणादिपाठः, लिङ्गानुशासनञ्चेति पञ्चावयवपूर्णस्य व्याकरणशास्त्रस्य रचनाविहिता। सम्पूर्णसंस्कृतवाङ्मयेष्वाचार्यपाणिनिकृताष्टाध्यायीमात्रं पञ्चावयवयुक्तो ग्रन्थोऽस्ति । तत्राष्टाध्याय्यां सञ्ज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारभेदात् षड् विधानि सूत्राणि समुपलभ्यन्ते । संज्ञाशास्त्रं व्याकरणशास्त्रे प्रयुज्यमानानि पारिभाषिकपदानि बोधयति । संज्ञासंज्ञिप्रत्यायकं सूत्रं संज्ञासूत्रं कथ्यते । स्वल्पाक्षरयुक्तं सन्देहरहितं सारवद् विस्तृतविवरणसामर्थ्ययुक्तं निरर्थकपदविहीनं दोषरहितञ्च सूत्रं भवति । नियमस्याभावे नियमव्यवस्थापनमेव परिभाषासूत्रस्योद्देश्यं वर्तते । अनियमे नियमकारिणी परिभाषा । परितः सर्वतो भाष्यन्ते नियमा याभिः ताः परिभाषा इति । अर्थात् यैः सम्पूर्णनियमस्य स्थिरताक्रियते तानि परिभाषासूत्राणि कथ्यन्ते । परिभाषासूत्रं विधिसूत्रस्याङ्गमस्ति । विधीयते इति विधिः कार्यम् । अप्राप्तौ सत्यां यद् विधीयमानं कार्यं विधिशब्देनोच्यते । लक्ष्यविषयकापूर्वसंस्कारविषयकबोधजनकत्वं विधिसूत्रत्वम् ।[1] विधिसूत्रं मुख्यतया द्विविधं भवति । उत्सर्गविधिः, अपवादविधिश्चेति भेदात् । नियमनमिति नियमः । सामान्यप्राप्तस्य विशेषावधारणं वा नियमः । व्याकरणे विधीनां नित्यप्रवृत्तौ सत्यां येन नियम्यते स नियमोऽङ्गीक्रियते ।[2] अर्थात् सर्वत्र <u>प्राप्तस्य विधेस्त</u>दितराविषयत्वसङ्कोचनं नियमः कथ्यते । अन्यधर्मस्याऽन्यत्राऽऽरोपणमतिदेशः ।[3] अतिदे*

1 अशोकचन्द्रगौडशास्त्री, वैयाकरणप्रबन्धमुक्तावली, पृ. ३६१ ।

2 वररूचिः, कविकल्पद्रुमः, १।१।१।

3 अन्यत्रैव प्रणीतायाः कृत्स्नाया धर्मसंहतेः । अन्यत्र कार्यतः प्राप्तिरतिदेशः स उच्यते ।
प्राकृतात् कर्मणो यस्मात् तत् समानेषु कर्मसु । धर्मप्रवेशो येन स्याददतिदेशः स उच्यते ।
अधिकरणमाला । उद्घृतः– द्विवेदी, जानकीप्रसादः, कातन्त्रव्याकरणविमर्शः, पूर्ववत्, पृ.२४१ ।

*श इववदितिसादृश्य-वाचकशब्दयोः प्रयोगेण साक्षादवगम्यते । अधिकरणमधिक्रियतेऽनेनेति वाऽधिकारः । स्वदेशे लक्ष्यसंस्कारक-वाक्यार्थबोधाजनकत्वे सति विधिशास्त्रैकवाक्यतापन्नलक्ष्यसंस्कारकवाक्यार्थबोधजनकत्वमधि-कारसूत्रत्वमिति वदन्ति वैयाकरणाः । परं यत्र सूत्रैकदेशस्यैवाधिकारः प्रवर्तते तत्र वाक्यार्थबोधजनकत्वं सम्भवति ।[४] अधिकारसूत्रस्य लक्षणं भवति उत्तरोत्तरगमनमधिकारः । तत्र वक्ष्यमाणार्थसङ्क्षेपाय कार्यिकार्यनिमित्तानां यदुदीरणं सोऽधिकारः । लेखेऽस्मिन् पाणिनिनाष्ट्ध्यायूयां परिभाषाप्रदानोद्देश्येन विरचितानां पारिभाषिकसूत्राणामेव संक्षिप्तरुपेण विवेचितमस्ति ।*

**मुख्यशब्दाः (शब्दकुञ्जी)** : अतिदेशः, अधिकारः, नियमः, परिभाषा, विधिः ।

## शोधकार्यस्य समस्योद्देश्यञ्च

किं नाम सूत्रम् ? सूत्रस्य लक्षणं किम् ? पाणिनीयतन्त्रे सूत्रस्य प्रयोगः कथं क्रियते ? षड् विधसूत्रलक्षणप्रक्रियायां के के नियमाः सन्ति ? पाणिनिनाष्टाध्यायां प्रयुक्तानां पारिभाषिकसूत्राणामनुशीलनं कथं कर्तुं शक्यते ? इत्येतासां जिज्ञासानां शमनार्थं विहितस्यास्यानुसन्धानस्य एते प्रमुखा विषयाः समस्यारुपेण उपस्थापिताः सन्ति । लेखेऽस्मिन् पूर्वोक्तसमस्यासमाधानार्थमुद्देश्यानि निर्धारितानि सन्ति । तानि च- सूत्रलक्षणपरिशीलनम्, षड्विधसूत्राणां स्वरुपप्रकाशनं तेषां मध्ये परिभाषासूत्राणामेव सोदाहरणं पर्यालोचनं विहितं वर्तते ।

## शोधविधिः

शोधसामग्रीसङ्कलनविधौ प्रचलितानां विधीनामत्र समुपयोगः कृतो वर्तते । तेषु निगमनागमनव्याख्यानात्मकविधयः प्रयुक्ताः सन्ति । प्रधानतयाऽत्र सूत्रलक्षणपरिशीलनक्रमे निगमनविधिः प्रयुक्तोऽस्ति । तथैव प्रमुखतया पुस्तकालयविधिरेवात्र सामग्रीसङ्कलने प्रयुक्तः ।

## शोधसीमाङ्कनम्

सञ्ज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारादिपदानां सामान्यपरिचयप्रदानपूर्वकं पाणिनीयव्याकरणे प्रयुक्तानां पारिभाषिकसूत्राणां परिशीलनमेवास्य शोधकार्यस्य सीमा वर्तते ।

## विषयपरिचयः

वैयाकरणपरम्परायां पाणिनिपूर्ववर्तिनः बहवः वैयकरणाः सन्त्यप्यधुना पाणिनीयव्याकरणमेव प्रसिद्धं वर्तते सर्वत्र पठनपाठने व्यवहारे च । इदं व्याकरणं परिष्कृतं लौकिकवैदिकशब्दानां प्रतिपादकञ्चास्ति । कात्यायनपतञ्जल्यादिभिः पर्यालोचितञ्च । कथयत्याचार्यः पतञ्जलिः-**प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण ।** [५] एतैश्च वाक्यैर्महिमाऽभिव्यक्तो व्याकरणस्य भाष्यकारेण भगवता पतञ्जलिना । तथैव पराशरोपपुराणेऽप्युक्तम् -

**पाणिनीयमहाशास्त्रं पदसाधुत्वलक्षणम् ।**

4 जानकीप्रसादः द्विवेदी, **कातन्त्रव्याकरणविमर्शः**, पूर्ववत् पृ. २५० ।

5. **व्याकरणमहाभाष्यम्**, पूर्ववत्, आ. २ ।

**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ।।** [६]

सम्पूर्णसंस्कृतवाङ्मयेष्वाचार्यपाणिनिकृताष्टाध्यायीमात्रं पञ्चावयवयुक्तो ग्रन्थोऽस्ति । पाणिनिना व्याकरणग्रन्थस्य पूर्णतायाः कृतेऽष्टाध्याय्यां सूत्रपाठः, धातुपाठः, गणपाठः (प्रातिपदिकपाठः), उणादिपाठः, लिङ्गानुशासनञ्चेति पञ्चावयवपूर्णस्य व्याकरणशास्त्रस्य रचना विहिता ।[७] संस्कृतभाषायां पाणिनीयव्याकरण-परम्परैव सर्वाधिकतया प्रचलिताऽस्ति ।

सूत्रविदो जानन्ति यत् स्वल्पाक्षरयुक्तं सन्देहरहितं सारवद् विस्तृतविवरणसामर्थ्ययुक्तं निरर्थकपदविहीनं दोषरहितञ्च सूत्रं भवति । पाराशरोपपुराणे सूत्रस्य परिचयप्रदानक्रमे उक्तञ्च-

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्**

**अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ।।** [८]

सूत्रमल्पाक्षरं भवेत् । सूत्रे यावच्छक्यं तावत् केवलमक्षराणामुपयोगो भवतु । सूत्रमसन्दिग्धमपि स्यात् । सन्दिग्धं नाम वक्रता । सूत्रे अस्पष्टता न भवेत् । सारवद् नाम अर्थवद् एव सूत्रम् । विश्वतोमुखम् बृहद्विषयकमपि सारवद् नाम अर्थवदेव सूत्रमित्युच्यते । अत्यन्तं संक्षिप्तरुपेण अर्थं बोधयेदिति सारवद् । अस्तोभं यस्य स्थाने अन्यस्य कस्यचिदपि स्थापनेन ज्ञानपूर्णता न भवति तद् अस्तोभम् । अनवद्यम् अवद्यं नाम दोषः । सूत्रे दोषः वा अपराधः वा न भवति । उपरि विवृतान् नियमान् यद् वाक्यं पालयति तदेव सूत्रमित्युच्यते । अर्थात् स्वल्पाक्षरयुक्तं सन्देहरहितं सारवद् विस्तृतविवरणकारकं दोषरहितम् अस्तोभं श्रद्धेयं वा पदं सूत्रं भवति । आचार्यपाणिनिकृताष्टाध्याय्यां ३९९६ सूत्राणि समुपलभ्यन्ते । उक्तञ्च–

**त्रीणि सूत्रसहस्राणि तथा नव शतानि च ।**

**षण्णवतिञ्च सूत्राणां पाणिनिः कृतवान् स्वयम् ।।** [९] इति ।

तत्र पाणिनीयतन्त्रे सञ्ज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारभेदात् सूत्राणि षड्विधानि समुपलभ्यन्ते । तथा हि-

**सञ्ज्ञा च परिभाषा च विधिर्नियम एव च ।**

**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ।।** [१०]

**अधिकारो विधिः सञ्ज्ञा निषेधो नियमस्तथा ।**

**परिभाषा च शास्त्रस्य लक्षणं षड्विधं विदुः ।।** [११]

वृद्धि-गुण-संयोगादिसञ्ज्ञाविधायकानि सूत्राणि सञ्ज्ञासूत्राणि कथ्यन्ते । **अनियमे नियमकारिणी परिभाषा,**[१०] सा च अव्यवस्थायां व्यवस्थामापादयति । **इको गुणवृद्धी** १।१।३।। १०**तस्मिन्निति निर्दिष्टे पूर्वस्य १।१।६६।।** इत्यादीनि परिभाषासूत्राणि कथ्यन्ते । आदेशादिविधायकानि **इको यणचि** ६।१।७७।।,

6. **पाराशरोपपुराणम्**, ८।२९।। कपिलदेवत्रिपाठी (सम्पा.), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वि.सं. २०४६, पृ. ९० ।

7. **युधिष्ठिरः मीमांसकः**, **संस्कृत व्याकरणशास्त्र का इतिहास**, दोस्रो भाग, पृ. ४४ ।

8. **पाराशरोपपुराणम्**, १८।१३।, पूर्ववत् ।

9. श्रीशचन्द्रसरस्वती, **न्यास १**, प्रस्तावनायाम्, पृ. क ।

**एचोऽयवायावः** ६।१।७८।। इत्यादीनि सूत्राणि विधिसूत्राणि कथ्यन्ते । प्राप्तस्य विधेः नियामकानि **कृत्तद्धितसमासाश्च** १।२।४६।।, **नलोपः सुप्स्वरसञ्ज्ञातुग्विधिषु कृतिः** ८।२।२।। इत्यादीनि नियमसूत्राणि कथ्यन्ते । अन्यतुल्यत्वविधानानि **स्थानिवदादेशोऽनलविधौ** १।१।५६।।, **अन्तादिवच्च** ६।१।८५।।, **गोतो णित्** ७।१।९०।। इत्यादीनि अतिदेशसूत्राणि मन्यन्ते । एकत्र उपात्तस्य अन्यत्र व्यापार अधिकारः । **प्राग्रीश्वर ान्निपाताः**, **पूर्वत्रासिद्धम्**, **कारके**, **प्रत्ययः**, **परश्च** इत्यादीनि सूत्राणि अधिकारसूत्राणि कथ्यन्ते ।

तत्र विधिसूत्राणि तावन्मुख्यानि तदुपकारकाणि चेतराणीति । तत्र सञ्ज्ञाशास्त्राणां विधिसूत्रघटकपदशक्तिग्रहे उपयोगः । यथा **वृद्धिरेचि** इति विधिसूत्रघटकवृद्धिपदस्य आकार ऐकार औ कारेषु शक्तिरिति **वृद्धिरादैच्** इति सञ्ज्ञासूत्रेणाऽवगम्यते । एवञ्च सञ्ज्ञासूत्रसाहाय्येन विधिसूत्रेण विधानं भवति । नियमस्याभावे नियमव्यवस्थापनमेव परिभाषासूत्रस्योद्देश्यं वर्तते । अनियमे नियमकारिणी परि भाषा इति शास्त्रकारेण कथितम् । परिभाषाया व्युत्पत्तिलभ्यमर्थमपि तत्सदृशमेवास्ति । परितः सर्वतो भाष्यन्ते नियमा याभिः ताः परिभाषा इति । अर्थात् यैः सम्पूर्णनियमस्य स्थिरताक्रियते तानि परि भाषासूत्राणि कथ्यन्ते । परिभाषासूत्रं विधिसूत्रस्याङ्गमस्ति । एतेषां षड्विधसूत्राणां तालिकयामाध्यमेन प्रस्तूयतेऽत्र-

| सूत्रप्रकारः | लक्षणम् | उदाहरणानि |
|---|---|---|
| संज्ञा | संज्ञासंज्ञिप्रत्यायकं सूत्रम् । | वृद्धिरादैच्, अदेङ् गुणः, हलन्त्यम् |
| परिभाषा | अनियमे नियमकारिणी । | तस्मिन्निति निर्दिष्टे पूर्वस्य |
| विधिः | आदेशादिविधायकं सूत्रम् । | वृद्धिरेचि, आद्गुणः, तस्यलोपः |
| नियमः | प्राप्तस्य विधेः नियामकम् ।<br>सिद्धे सत्यारभ्यमानो विधिः । | पतिः समास एव,<br>कृत्तद्धितसमासाश्च |
| अतिदेशः | अन्यतुल्यत्वविधानम् । | स्थानिवदादेशोऽनल्विधौ |
| अधिकारः | एकत्र उपात्तस्य अन्यत्र व्यापारः । | प्रत्ययः, पूर्वत्रासिद्धम् । |

लेखेऽस्मिन् पाणिनिनाष्टाध्याय्यां परिभाषाप्रदनोद्देश्येन विरचितानां पारिभाषिकसूत्राणामेव संक्षिप्तरुपेण समीक्षितं वर्तते ।

## परिभाषासूत्राणि

परितो भाष्यतेऽनया इति व्युत्पत्त्या परिभाषा शब्दो निष्पद्यते । परिभाषा तावद् व्याकरणशास्त्रीयनियमान् अनवद्यान् करोति । काशिकादिग्रन्थेषु अनियमे नियमकारिणी परिभाषा इति लक्षणमुपलभ्यते । अत एवोक्तम्- **अनियमे नियमकारिणी परिभाषा ।**[10] अनियमे नियमकारित्वं परि भाषासूत्रत्वम् । तदुक्तं भगवता पतञ्जलिना- **परिभाषा पुनरेकदेशस्था (सति) सर्वं शास्त्रमभिज्वलयति प्रदीपवत् ।**[10] इति । श्रीनागेशभट्टो व्याकरणमहाभाष्ये उद्योतटीकायां वदति-

**एकदेशस्थिता शास्त्रभवने याति दीपताम् ।**

**परितो व्यापृतां भाषां परिभाषां प्रचक्षते ।।** [10]

परिभाषेन्दुशेखरग्रन्थस्य विजयानाम्नीटीकायां पं. जयदेवमिश्रेणोक्तम्- **विधिं शास्त्रप्रवृत्तिनिवृत्युपयो**

10. नागेशभट्टः, **व्याकरणमहाभाष्यस्य**, **उद्योतटीका**, पूर्ववत्, २।१।१।।

**गि साधुत्वाप्रकारकशक्त्यविषयकबोधजनकत्वे सति अधिकारशास्त्रभिन्नत्वं परिभाषात्वम्** ।[११] सभापतिशर्मोपाध्यायमहाभागा सिद्धान्तकौमुद्याः लक्ष्मीटीकायां स्वीकुर्वन्ति यत्- **परिभाषात्वञ्च सङ्केतग्राहकाभिन्नत्वे सति विधिशास्त्रविशिष्टत्वम् । वैशिष्ट्यञ्च अननुवृत्या स्वजन्यप्रमात्मकबोधापकारकत्वस्वप्रवृत्तिनिवृत्यन्तर-प्रयोजकत्वविशिष्टपाणिनि-प्रयत्नन्यायान्यतरसिद्धत्वान्यतरसम्बन्धेन । अनुवृत्येति निवेशेनाधिकारव्यवच्छेदः । आद्यसम्बन्धेनाऽष्टाध्यायीस्थपरिभाषाणां संग्रहः । द्वितीयेन न्यायज्ञापकसिद्धानाम् अनुदत्तम् पदमेकवर्जम् इत्यादेश्च संग्रहः** ।[११] इति ।

परिभाषा द्विविधा पाणिनिना अष्टाध्याय्यां सूत्ररुपेण पठिताः परिभाषाः, अन्यसूत्रादितो ज्ञापिताः न्यायसिद्धप्रभृतयः वा अन्यैर्वैयाकरणैः कृताश्च । तादृशानि परिभाषासूत्राणि प्रथमश्रेण्यामागच्छन्ति । यथा **आदेः परस्य**, **इको गुणवृद्धी** इत्यादि द्वितीयश्रेण्यां परिभाषामाश्रित्य कृता ग्रन्थाः परिभाषापाठादयो ग्रन्थाः समाविशन्ति । येषां पाणिनीयसूत्राणां यथाकालं यथोद्देशं च सम्पूर्णेऽपि व्याकरणशास्त्रे नियमकारित्वेनोपस्थितिर्भवति । तानि परिभाषासूत्राणीति वैयाकरणा वदन्ति । परिभाषाणामिदमेव कार्यं भवति यद् व्याकरणशास्त्रे दृष्टस्याऽनियमस्य दूरीकरणम् । यथा तस्मिन्निति निर्दिष्टे पूर्वस्य, तस्मादित्युत्तरस्य प्रभृतीनि परिभाषासूत्राणि । द्वितीयविधाः परिभाषाः सूत्रपाठात् बहिर्भूताः सत्यपि सूत्रेण ज्ञापितत्वात् सूत्रकारद्वारा तन्नियमानां स्वीकृतत्वात्, न्यायसिद्धाश्च परिभाषाः लोकविदितत्वात्ताः सूत्रवत् प्रमाणत्वेन स्वीक्रियन्ते । तत्र च सूत्रवदसिद्धादीनि कार्याणि जायन्ते ।

तादृश्यः परिभाषाश्चतुर्विधाः सन्ति ।[११] ज्ञापिता, ज्ञापकसिद्धा वा, न्यायसिद्धा, वाचनिकी, मिश्रिता चेति भेदात् ।

१. ज्ञापिता, ज्ञापकसिद्धा वा परिभाषाः ता उच्यन्ते याः केनचित् सूत्रेण ज्ञाप्यन्ते । यथा- व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहलक्षणम् ।

२. न्यायसिद्धाः परिभाषाः ता उच्यन्ते या लौकिकन्यायानुकूलाः स्युः । यथा- गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ।

३. वाचनिक्यः परिभाषाः ता उच्यन्ते या न तु सूत्रज्ञापिताः, न वा न्यायसिद्धाः, अपितु आचार्याणां वचनरुपाः । वचनिक्यः परिभाषाः द्विधा विभज्यन्ते । परिभाषारुपेण स्वीकृतानि वार्तिककारवचनानि, परिभाषारुपेण स्वीकृतानि भाष्यकारवचनानि चेति ।

४. मिश्रिताः परिभाषाः ता उच्यन्ते यासाम्परिभाषाणामेकदेशः सूत्रकारेण ज्ञाप्यते एकदेशश्च न्यायसिद्धः अथवा एकदेशः पूर्वाचार्यैर्वचनरुपेण पठितः ।

पाणिनिना अष्टाध्याय्यां परिभाषासूत्राणि पठितानि । यथा- **इकोगुणवृद्धिः** १।१।३॥, **अचश्च** १।२।२८॥, **आद्यन्तौ टकितौ** १।१।४६॥, **मिदचोऽन्त्यात्परः** १।१।४७॥, **षष्ठी स्थानेयोगाः** १।१।४९॥, **स्थानेऽन्तरतमः** १।१।५०॥, **तस्मिन्निति निर्दिष्टे पूर्वस्य** १।१।६६॥, **तस्मादित्यत्तरस्य** १।१।६७॥, **अलोऽन्त्यस्य** १।१।५२॥, **ङिच्च** १।१।५३॥, **आदेः परस्य** १।१।५४॥, **अनेकालशित्सर्वस्य** १।१।५५॥ **स्वरितेनाधिकारः** १।३।११, **विप्रतिषेधे परं कार्यम्** १।४।२॥, **पूर्वत्रासिद्धम्** ८।२।१॥ इत्यादिनि । तानि विविधेषु अध्यायेषु पादेषु च विकीर्णानि सन्ति । वार्तिककारेण कात्यायनेन प्रायेण एकचत्वारिंशन्मितानि

वार्तिकानि प्रणीतानि, यानि परिभाषाप्रकृतिकवचनानि स्वीकर्तुं युज्यन्ते । पूर्वं परिभाषाणामनेके आचार्याः प्रवक्तार आसन् । सम्प्रति वैयाकरणनिकाये नागेशभट्टप्रणीतः परिभाषेन्दुशेखरः नामा ग्रन्थः परिभाषाविषये प्रचलति । तत्र त्रिषु प्रकरणेषु १३२ मिताः परिभाषा व्याख्याताः ।

पाणिनीयव्याकरणे प्रयुक्तानि पारिभाषिकसूत्राणि यथा सन्ति–[11]

| | | |
|---|---|---|
| १. | गुणवृद्धिस्थाननिर्देशपरिभाषा | इको गुणवृद्धी १।१।३।। |
| २. | व्यपदेशिवद्भावज्ञापकपरिभाषा | आद्यन्तवदेकस्मिन् १।१।२१।। |
| ३. | आगमस्थाननिर्णयपरिभाषा | आद्यन्तौ टकितौ १।१।४६।।,<br>मिदचोऽन्त्यात्परः १।१।४७।। |
| ४. | ह्रस्वादेशनिर्णयपरिभाषा | एच इग्घ्रस्वादेशे १।१।४८।। |
| ५. | षष्ठिविभक्तिनिर्णयपरिभाषा | षष्ठी स्थानेयोगा १।१।४९।। |
| ६. | आदेशचयननिर्णयपरिभाषा | स्थानेऽन्तरतमः १।१।५०।। |
| ७. | ऋकारादेशविधानपरिभाषा | उरण् रपरः १।१।५१।। |
| ८. | आदेशस्थाननिर्णयपरिभाषा | अलोऽन्त्यस्य १।१।५२।।<br>ङिच्च १।१।५३।।<br>आदेः परस्य १।१।५४।।<br>अनेकाल्शित्सर्वस्य १।१।५५।। |
| ९. | प्रत्ययलक्षणपरिभाषा | प्रत्ययलोपे प्रत्ययलक्षणम् १।१।६२।।<br>न लुमताङ्गस्य १।१।६३।। |
| १०. | सप्तमीविभक्तिनिर्णयपरिभाषा | तस्मिन्निति निर्दिष्टे पूर्वस्य १।१।६६।। |
| ११. | पञ्चमीविभक्तिनिर्णयपरिभाषा | तस्मादित्युत्तरस्य १।१।६७।। |
| १२. | ह्रस्वदीर्घप्लुतादेशस्थाननिर्णयपरिभाषा | अचश्च १।२।२८।। |
| १३. | अनुदेशपद्धतिविधानपरिभाषा | यथासङ्ख्यमनुदेशः समानाम् १।३।१०।। |
| १४. | अधिकारनिर्णयपरिभाषा | स्वरितेनाधिकारः १।३।११।। |
| १५. | विप्रतिषेधे सूत्रनिर्णयपरिभाषा | विप्रतिषेधे परं कार्यम् १।४।२।। |
| १६. | पदविधौ सामर्थ्यनिरुपणपरिभाषा | समर्थः पदविधिः २।१।१।। |
| १७. | कृदधिकारे सप्तमीविभक्तिनिर्णयपरिभाषा | तत्रोपपदं सप्तमीस्थम् ३।१।९२।। |
| १८. | कृदधिकारे उत्सर्गापवादमसबन्धज्ञापकपरिभाषा | वाऽसरुपोऽस्त्रियाम् ३।१।९४।। |
| १९. | स्वरनिर्णयपरिभाषा | अनुदात्तं पदमेकवर्जम् ६।१।१५८।। |

पाणिनीयाष्टाध्याय्यां प्रयुक्तानां पारिभाषिकसूत्राणां यथाक्रमेण परिशीलनमत्र विहितमस्ति । यथा-

## गुणवृद्धिस्थाननिर्देशकपरिभाषा

गुणवृद्धिस्थाननिर्देशपरिभाषासूत्रम् **इको गुणवृद्धी १।१।३।।** इत्यस्ति । गुणश्च वृद्धिश्च इति गुणवृद्धी । इतरेतरयोगद्वन्द्वः । इकः इति षष्ठ्यन्तानुकरणं प्रथमान्तं पदम् । गुणवृद्धी इत्यपि प्रथमान्तं पदम् । गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इकः इति षष्ठ्यन्तं पदमुपतिष्ठते अर्थात् यत्र गुणवृद्धिपदाभ्यां गुणवृद्धी विधीयेते तत्र इक् इत्यस्य स्थाने गुणवृद्धिविधानं बोद्धव्यम् । अत्र **अदेङ्गुणः** इत्यतो गुणस्यानुवृत्तिः, **वृद्धिरादैच्** इत्यतो वृद्धिपदस्यानुवृत्तिर्भवति । अत एव उपरिनिर्दिष्टोऽथो

निष्पद्यते । कथं अस्मिन् सूत्रे पुनः गुणवृद्धीशब्दौ उपस्थापितौ ? इति शङ्कायामत्र सूत्रे गुणवृद्धी–शब्दग्रहणसामर्थ्याद् गुणवृद्धी शब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इकः इति षष्ठ्यन्तं पदमुपतिष्ठते । यथा– **मिदेर्गुणः** ७।३।६२॥ इत्यादौ मिद् इति कथनेन मिद् धातोः इक् इत्यर्थो भवति । तथैव **मृजेर्वृद्धिः** ७।२।११४॥ इत्यत्र मृज् इति कथनेन मृज् धातोः इक् इत्यस्य वृद्धिः भवति इत्यर्थो जायते । अत्र सूत्रैः विधीयमानगुणवृद्धिपदे स्थानस्य निर्देशाभावे इक् इत्यस्य उपस्थितेः कारणात् मिद् धातोः इक् इत्यस्य गुणः (इ=ए) तथा च मृज् धातोः इक् (ऋकार) इत्यस्य वृद्धिः (ऋ=आर्) भवति । **अदेङ्गुणः** इत्यतः अनुवृत्तं गुणपदं तथा च **वृद्धिरादैच्** सूत्रतः अनुवृत्तं वृद्धिपदं स्वशब्दस्वरुपे एव स्थितं भवति । प्रकृतसूत्रे उच्चारितौ गुणवृद्धिशब्दौ अर्थबोधकत्वकारणात् क्रमशः गुणपदेन अ, ए, ओ एवं वृद्धिपदेन आ, ऐ, औ इत्यादीनां परिचायकौ भवतः ।

### व्यपदेशिवद्भावज्ञापकपरिभाषा

व्यपदेशिवद्भावज्ञापकपरिभाषासूत्रम् **आद्यन्तवदेकस्मिन् १।१।२१।।** इत्यस्ति । केवलं एकः वर्णः अस्ति चेत् सः यथा आदिवत् कार्यम् करोति, तथैव अन्तवदपि कार्यं करोति । यदि कुत्रचित् शब्दस्य आदिवर्णस्य किमपि कार्यमुक्तमस्ति तत्र यद्यपि तस्मिन् शब्दे एकः एव वर्णः अस्ति, तथापि सः एव आदिवर्णसंज्ञां स्वीकरोति । तथैव, यदि कुत्रचित् शब्दस्य अन्तिमवर्णस्य किमपि कार्यमुक्तमस्ति तत्र यद्यपि तस्मिन् शब्दे एकः एव वर्णः अस्ति, तथापि सः एव अन्तिमवर्णः ज्ञातव्यः इति अस्य सूत्रस्य आशयः । यथा- अ (विष्णुः) इति अकारान्तपुंलिङ्गशब्दः । अस्य तृतीयाद्विवचनस्य रूपसिद्धौ अभ्याम् इति स्थिते एकः प्रश्नः आगच्छति- सुपि च ७।३।१०२॥ इत्यनेन अङ्गस्य अन्तिम-अकारस्य दीर्घादेशो भवति । परन्तु अत्र अङ्गे केवलं एकः एव वर्णः अस्ति । तर्हि सः एव अन्तिमवर्णरुपेण स्वीकर्तुं शक्यते वा ? तस्मात् पूर्वम् किमपि नास्ति चेत् अयमन्तिमवर्णः कथं स्यादिति संशयः । अस्य उत्तरमनेन सूत्रेण दीयते- यत्र एकः एव वर्णः अस्ति, तत्र सः आदिवर्णवत् अपि कार्यं करोति, अन्तिमवर्णवत् अपि कार्यं करोति । अतः अत्र अनेन **सुपि च ७।३।१०२।।** इत्यनेन अकारस्य दीर्घः भवितुमर्हति । परिभाषेन्दुशेखरे विषयेऽस्मिन् एका परिभाषा दत्ता अस्ति- **व्यपदेशिवदेकस्मिन्** । अस्याः परिभाषायाः अर्थः अयम्- कस्यापि पदार्थस्य एकस्य भागस्य दत्तमभिधानमपि सः पदार्थः तदा स्वीकरोति यदा सः पदार्थः स्वयम् एकभाग-इत्येव अस्ति । इयम् परिभाषा अस्य सूत्रस्यैव अर्थम् स्पष्टीकरोति ।

### आगमस्थाननिर्णायकपरिभाषा

आगमस्थाननिर्णयपरिभाषाविधायकौ द्वौ सूत्रौ स्तः । **आद्यन्तौ टकितौ १।१।४६।। मिदचोऽन्त्यात्परः १।१।४७।।** इति च । **आद्यन्तौ टकितौ १।१।४६।।** इति सूत्रेण टित्कितौ यस्योक्तौ तस्य तौ क्रमादाद्यन्तावयवौ भवतः । अर्थात् टकार इत्संज्ञक एवं ककारइत्संज्ञकागमः यम् आगमं विधीयमानं स्यात् तौ क्रमशः टित् इत्यस्य आद्यवयव कित् इत्यस्य अन्तावयवश्च भवतः । टश्च कश्च टकौ, टकौ इतौ ययोः तौ टकितौ । द्वन्द्वगर्भो बहुव्रीहिः । आदिश्च अन्तश्च आद्यन्तौ । इतरेतरद्वन्द्वः । टित् इत्यस्योदाहरणम्– षट्त्सन्तः, षट् सन्तः अत्र **डः सि धुट्** ८।३।२९॥ इत्यनेन धुट् (ध्) भवति । सकारस्य आदि अवयवः, चर्त्व (ध् त) षड् त् सन्तः । ततः षट्त्सन्तः इति रुपं भवति । तथैव कित् इत्यस्योदाहरणम्– प्राङ्+षष्ठः इत्यत्र **ङणो कुक्टुक् शरि** ८।३।२८॥ इति सूत्रेण कुकागमेऽनुबन्धलोपे

कित्वात् आद्यन्तौ टकितौ इति सूत्रेण ङकारस्यान्तावयवे कुक् भवति । अतः प्राङ्क्षष्ठः इति रुपं सिद्ध्यति । तथैव सुगण्+षष्ठः इत्यत्राऽपि टुगागमे कृते णकारस्यान्तावयवः टुक् भवति । अत एव सुगण्ट् षष्ठः इति रुपं सिद्धं भवति ।

तथैव **मिदचोऽन्त्यात्परः १।१।४७।।** मकारः इत् यस्य स मित् । अन्यादचः परो भवति । सेमुचादीनाम् इत्यादौ इदं न प्रवर्तते । तत्र अन्यस्याचोऽभावात् । अचः इति षष्ठ्यन्तम् । अचां मध्ये योऽनत्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात् । सूत्रे मित्, अचः, अन्त्यात् परः एते चत्वारि पदानि सन्ति । सूत्रेऽस्मिन् अच इति निर्धारणे षष्ठी । अर्थात् सन्निविष्टानामन्त्यादयः परो मिद् भवति । स्थाने योग प्रत्ययपरत्वस्य अयमपवादः । यथा– ज्ञानानि इत्यत्र ज्ञान+जस्, **जश्शसो शिः** इति सूत्रे शि आदेशे, ज्ञान+शि इति जातेऽनुबन्धलोपे ज्ञान+इ इत्यत्र सर्वनामस्थानसंज्ञायाम् **नपुंसकस्य झलचः** इति सूत्रेण नुमागमे मकारस्य उकारस्य चानुवन्धलोपे ज्ञान+न्+इ इत्यवस्थायां न् इत्यस्य स्थाननिर्धारणक्रमे **मिदचोऽन्त्यात्परः** इति सूत्रेण अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात् इत्यर्थकरणेन न इति अक्षरम् अन्त्यावयवस्य भवति । ततः ज्ञानन् इ इत्यत्र उपधासंज्ञायाम् **सर्वनामस्थाने चासम्बुद्धौ** इति सूत्रेण दीर्घे ज्ञानानि इति रुपं सिद्ध्यति । तथैव मुञ्चति, पयांसि, विरूणद्धि इत्यादि रुपाण्यपि भवन्ति ।

**ह्रस्वादेशनिर्णयपरिभाषा**

**एच इग्घ्रस्वादेशे १।१।४८।।** इति ह्रस्वादेशनिर्णयपरिभाषासूत्रमस्ति । एच्-वर्णस्य ह्रस्वादेशे कृते इक्-वर्णः विधीयते । प्रत्याहाराः एच् = ए, ओ, ऐ, औ । इक् = इ, उ, ऋ, लृ । एच्-प्रत्याहारस्थस्य स्वरस्य स्थाने यदि ह्रस्वादेशः प्राप्नोति, तर्हि तत्र इक्-प्रत्याहारस्थवर्णः एव आदेशरुपेण विधीयते इति सूत्रस्य आशयः । अत्र उचितस्य आदेशस्य निर्णयः स्थानसाधर्म्यस्य आधारेण क्रियते । इत्युक्ते, एकारस्य ऐकारस्य च स्थाने इकारः विधीयते, यतः एतेषाम् सर्वेषाम् उच्चारणार्थम् तालुनः साहाय्यं स्वीक्रियते । एवमेव, ओकारस्य औकारस्य च स्थाने उकारः विधीयते, यतः एतेषाम् सर्वेषाम् उच्चारणार्थम् ओष्ठयोः साहाय्यं स्वीक्रियते । क्रमेण उदाहरणानि एतानि–

**एकारस्य ह्रस्वादेशे इकारादेशः** – हेड्-धातोः एकारस्य णिच्-प्रत्यये परे **मितां ह्रस्वः ६।४।९२।।** इित ह्रस्वादेशे प्राप्तेसति प्राकृतपरिभाषाम् उपयुज्य इकारः आदेशरुपेण विधीयते ।

**ऐकारस्य ह्रस्वादेशे इकारादेशः**– अतिरै-इति ऐकारान्तशब्दः यदा नपुंसके प्रयुज्यते, तदा **ह्रस्वो नपुंसके प्रातिपदिकस्य १।२।४७।।** इत्यनेन ह्रस्वादेशो भवति । अत्र ऐकारस्य स्थाने ह्रस्वादेशे प्राप्ते प्रकृतसूत्रेण इकारः आदेशरुपेण विधीयते ।

**ओकारस्य ह्रस्वादेशे उकारादेशः**– श्लोक्-धातोः लिट्-लकारस्य प्रक्रियायाम् अभ्यासे विद्यमानस्य ओकारस्य ह्रस्वादेशे कर्तव्ये प्रकृतसूत्रेण तस्य उकारादेशो भवति ।

**औकारस्य ह्रस्वादेशे उकारादेशः** – अतिनौ इति औकारान्तशब्दः यदा नपुंसके प्रयुज्यते, तदा **ह्रस्वो नपुंसके प्रातिपदिकस्य १।२।४७।।** इत्यनेन अस्य ह्रस्वादेशो भवति । अत्र औकारस्य स्थाने ह्रस्वादेशे प्राप्ते प्रकृतसूत्रेण उकारः आदेशरुपेण विधीयते ।

**षष्ठिविभक्तिनिर्णयपरिभाषा**

षष्ठिविभक्तिनिर्णयपरिभाषासूत्रम् **षष्ठी स्थानेयोगा १।१।४९।।** इत्यस्ति। अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या । स्थानं च प्रसङ्गः । सूत्रेऽस्मिन् षष्ठीप्रथमैकवचनान्तम्, स्थाने सप्तम्येकवचनान्तम् । इदं परिभाषासूत्रं योगनियमार्थम् । इह शास्त्रे या षष्ठी अनियतयोगा श्रूयते सा स्थानेयोगैव भवति । यथा **अस्तेर्भूः** इति अस्तेः स्थाने भूर्भवति । तेन भविता, भवितम्, भवितव्यम् इत्यादिरुपाणि सिद्ध्यन्ति ।

**आदेशचयननिर्णयपरिभाषा**

**स्थानेऽन्तरतमः १।१।५०।।** इत्यादेशचयननिर्णयपरिभाषासूत्रमस्ति । प्रसङ्गे सति सदृशतम आदेशः स्यात् । यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः । अत्र स्थाने, अन्तरतमः द्वे पदे स्तः । कुतः शब्दस्यान्तर्यम् ? स्थानार्थगुणप्रमाणतः । यथा– दध्यत्र इत्यत्र इकारस्य स्थाने यकारः कथम् ? इति जिज्ञासायां सूत्रमिदं नियमनं करोति यत् तालुस्थानीयस्य इकारस्य स्थाने सादृश्यात् तालुस्थानीयो यकारो भवति नान्यः । एवमेव दण्डाग्रम्, यूपाग्रम् इत्यत्राऽपि द्वयोरकारयोः कण्ठ्य एवाकारो भवति । **अकः सवर्णे दीर्घः** इति सूत्रेण । अर्थतः आन्तर्यम् पादशब्दस्य पदादेशः । गुणतः आन्तर्यं वाग्घरिः । प्रमाणतः **अदसोसे र्दादुदो मः** इति सूत्रेण ह्रस्व-उकारः स्थाने दीर्घ-ऊकारः । इति ।

**ऋकारादेशविधानपरिभाषा**

ऋकारादेशविधानपरिभाषासूत्रम् **उरण् रपरः १।१।५१।।** इत्यस्ति । ऋवर्णस्य लृवर्णस्य आदेशरुपेण विधीयमानात् अवर्णात् इवर्णात् उवर्णात् अनन्तरम् नित्यम् (यथासङ्ख्येयम्) रेफः र लकारः विधीयते । ऋवर्णस्य स्थाने (इत्युक्ते, ऋकारस्य, दीर्घ ऋकारस्य, लृकारस्य च स्थाने) यत्र अण्-वर्णस्य (अआइईउऊ-कारस्य) आदेशः भवति, तत्र तस्मात् अण्-वर्णात् नित्यम् रेफः अपि विधीयते । एवमेव, लृवर्णस्य स्थाने यत्र अण्-वर्णस्य (अआइईउऊ-कारस्य) आदेशः भवति, तत्र तस्मात् अण्-वर्णात् नित्यम् लकारः अपि विधीयते । सूत्रे प्रयुक्तः उः इति शब्दः ऋ-शब्दस्य षष्ठ्येकवचनम् अस्ति । अत्र विद्यमानः ऋ-शब्दः सवर्णग्रहणं करोति । अतः अत्र ऋ-इत्यनेन ऋकारस्य १८ भेदाः, लृकारस्य च १२ भेदाः इति आहत्य ३० भेदाः निर्दिश्यन्ते ।

**आदेशस्थाननिर्णयपरिभाषा**

आदेशस्थाननिर्णयपरिभाषाविधायकानां चतुर्णां सूत्राणां विवेचनमत्र विधीयते । ते च यथा सन्ति-

**अलोऽन्त्यस्य १।१।५२।। ङिच्च १।१।५३।। आदेः परस्य १।१।५४।। अनेकाल्शित्सर्वस्य १।१।५५।।** इति । तेषां सङ्क्षितरुपेण विवेचनमत्र प्रस्तूयते ।

**अलोऽन्त्यस्य १।१।५२।।** षष्ठीनिर्दिष्टस्यान्त्यस्याल आदेशो भवति । अर्थात् षष्ठीनिर्दिष्टे स्थाने जायमानः आदेशः अन्त्यस्य अलः स्थाने भवति । उदाहरणाय संयोगान्तस्य लोपः इत्यनेन षष्ठ्यन्त- संयोगान्तस्य सुद्ध्य् इत्यस्य स्थाने लोपादेशो भवति, प्रकृतसूत्रेण अयं लोपादेशः तस्य अन्तिमवर्णयकारस्य भवति ।

**ङिच्च १।१।५३।।** अयमप्यन्तस्यैव स्यात् । सर्वस्य इत्यस्य अपवादः । ङकारः इत् यस्य

स ङित् । ङकार इत् येषां ते आदेशाः अन्त्यस्य अल्वर्णस्य स्थाने भवन्ति । इदं सूत्रं अनेकाल् शित्सर्वस्य सूत्रस्यापपादकः । उदाहरणाय सखि+सु अत्र अनङादेशे प्राप्ते सति ङित्वात् प्रकृतसूत्रेण सखि इत्यस्य अन्तिमवर्णस्येकारस्य स्थाने एव अनङादेशो भवति । अतः सख्+अनङ्+सु इत्यवस्थायामनुबन्धलोपे वर्णमेलने दीर्घे सकारस्य नकारस्य च लोपे सखा इति रुपं सिद्धं भवति ।

**आदेः परस्य १।१।५४।।** परस्य यद्विहितं तत्तस्यादेर्बोध्यम् । **अलोऽन्त्यस्य** इत्यस्यापवादः । परस्य क्व कार्यं शिष्यते ? अत्र पञ्चमीनिर्देशः । अर्थात् परस्य स्थाने विहितं कार्यं तस्यादेः अल्वर्णस्य स्थाने भवति । आदेः परस्य पष्ठ्येकवचनान्तम् । तद्यथा–उत्थानम् इत्यत्र उद्+स्थानम् इत्यवस्थायां **उदः स्थास्तम्भोः पूर्वस्य** इति सूत्रेण परस्य पूर्वसवर्णे कृते आन्तरतम्यात् प्रमाणतः सकारस्य स्थाने थकारो भवति । अतः **आदेः परस्य** इति षरिभाषासूत्रबलेन पञ्चमीविभक्तिनिर्देशात् पर इत्यस्य स्थाने विधीयमानो थादेशः पर इत्यस्यादौ भवति । उद्+थ्थानम् इत्यवस्थायां **झरो झरि सवर्णे** इति सूत्रेण थकारलोपे, चर्त्वे वर्णमेलने च उत्थानम् इति सिद्धं भवति । एवञ्च ईदासः, आसीनः इत्यादीनि रुपाण्यपि सिद्ध्यन्ति ।

**अनेकाल्शित्सर्वस्य १।१।५५।।** न एकः अनेकः, अनेकः अल् यस्य सः अनेकाल् । शकारः इत् यस्य स शित् । अनेकाल् च शित् चेति समाहारद्वन्द्वः । अर्थात् षष्ठी इत्यस्य स्थाने विहितादेशः यदि अनेकवर्णयुक्ता अथवा शकार इत्संज्ञका स्यात् तर्हि सः आदेशः सम्पूर्णषष्ठीनिर्दिष्टस्य स्थाने भविष्यति । यथा– राम+भिस् अत्र भिस् इत्यस्य स्थाने ऐस् सम्पूर्णषष्ठ्यन्तपदस्य स्थाने विहिते सति राम+ऐस् = र ामैः इति रुपं सिद्धं भवति । तथैव ज्ञानानि इत्यत्रापि ज्ञान+जस् इत्यवस्थायां जस् इत्यस्य स्थाने शि (इ) आदेशो भवति । ज्ञान+इ इत्यत्र प्रकृतसूत्रेण शित्वात् सम्पूर्णस्य जस् इत्यस्य स्थाने विहिते सति ज्ञानानि इति रुपं सिध्यति । तथैव अस्तेर्भूः इति सूत्रेण अनेकालत्वात् अस्धातोर्भू आदेशो भवति । **अष्टाभ्य औश्** इत्यत्राऽपि औश् आदेशः शित्वात् जस्शसोः सम्पूर्णयोः स्थाने भवति ।

**प्रत्ययलक्षणपरिभाषा**

**प्रत्ययलोपे प्रत्ययलक्षणम् १।१।६२।।** इति प्रत्ययलक्षणपरिभाषाविधायकसूत्रमस्ति । प्रत्ययस्य लोपे कृते अपि प्रत्ययाश्रितं कार्यम् भवति । अष्टाध्याय्याम् लुक् श्लु लुपः तथा लोपः इत्येताभिः चतसृभिः संज्ञाभिः प्रत्ययस्य लोपः।। विधीयते । एताभ्यः कयाचिदपि संज्ञया प्रत्ययस्य लोपः क्रियते चेदपि लुप्तप्रत्ययनिमित्तकम् कार्यम् प्रक्रियायाम् अवश्यं भवति, इति प्रकृतसूत्रस्य आशयः । कानिचन उदाहरणानि एतानि–

१. नदी-शब्दस्य प्रथमैकवचनस्य रुपसिद्धौ सु-प्रत्ययस्य लोपे कृते अपि प्रकृतसूत्रेण पदसंज्ञा अवश्यं प्रवर्तते । नदी सु प्रथमैकवचनस्य प्रत्ययः, **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ६।१।६८।।** इति सु-प्रत्ययस्य लोपः । सु-प्रत्ययस्य लोपे अपि **प्रत्ययलोपे प्रत्ययलक्षणम् १।१।६२।।** इत्यनेन प्रत्ययनिमित्तकम् कार्यम् भवति, अतः **सुप्तिङन्तं पदम् १।४।१४।।** इत्यनेन नदी इत्यस्य पदसंज्ञा भवति ।

२. षष् इति षट्-संज्ञकशब्दस्य प्रथमाबहुवचनस्य रुपसिद्धौ जस्-प्रत्ययस्य लुकि कृते अपि

प्रकृतसूत्रेण पदसंज्ञा अवश्यं प्रवर्तते ।

३. अदस्-शब्दस्य प्रथमैकवचनस्य रुपसिद्धौ सु-प्रत्ययस्य लोपे कृते **प्रत्ययलोपे प्रत्ययलक्षणम् १।१।६२।।** इत्यनेन प्रत्ययविशिष्टं कार्यम् अवश्यं प्रवर्तते, अतः **तदोः सः सावनन्त्ययोः ७।२।१०६।।** इति दकारस्य सकारे कृते इष्टरुपं सिद्धयति ।

४. अग्नि इति उपपदस्य उपस्थितौ स्वादिगणस्य चि धातोः **अग्नौ चेः ३।२।९१।।** इत्यनेन क्विप्-प्रत्यये कृते, तस्य लोपादनन्तरम् प्रत्ययलक्षणेन तुगागमो भवति ।

५. दुह्-धातोः लङ्लकारस्य प्रथमपुरूषैकवचनस्य रुपसिद्धौ तिप्-प्रत्ययस्य लोपे कृते अपि प्रत्ययलोपे **प्रत्ययलक्षणम् १।१।६२।।** इत्यनेन प्रत्ययविशिष्टं कार्यं भवति । अतः **सुप्तिङन्तं पदम् १।४।१४।।** इत्यनेन पदसंज्ञा विधीयते, येन अग्रे लघूपधगुणः, तथा च भष्भावादीनि त्रिपादीकार्याण्यपि प्रवर्तन्ते ।

**न लुमताङ्गस्य १।१।६३।।** लुक् श्लुः लुप्- एतैः शब्दैः यस्य प्रत्ययस्य लोपो भवति तस्य निमित्तकम् अङ्गकार्यम् न भवति । अष्टाध्यायूयाम् इत्येताभिः चतसृभिः संज्ञाभिः प्रत्ययस्य लोपः विधीयते । एताभ्यः कदाचिदपि संज्ञया प्रत्ययस्य लोपः क्रियते चेदपि (लुप्त)प्रत्ययनिमित्तकम् कार्यम् प्रक्रियायाम् अवश्यं भवति इति सिद्धान्तः **प्रत्ययलोपे प्रत्ययलक्षणम् १।१।६२।।** इति पूर्वसूत्रेण निर्दिष्टः अस्ति । अस्य सिद्धान्तस्य अपवादरुपेण **न लुमताङ्गस्य १।१।६३।।** इति प्रकृतसूत्रं प्रवर्तते । यदि प्रत्ययस्य लोपः लुकश्लुलुपः एताभ्यः काचित् संज्ञाम् उपयुज्य कृतः अस्ति, तर्हि लुप्तप्रत्ययनिमित्तकम् जायमानम् अङ्गविशिष्टं कार्यं नैव करणीयम् । उदाहरणानि एतानि –

(१) प्रत्ययस्य लुकि कृते अङ्गकार्यस्य निषेधः – इदम् शब्दस्य नपुंसकलिङ्गस्य प्रथमैकवचनस्य प्रक्रियायाम् **स्वमोर्नपुँसकात् ७।१।२३।।** इति सूत्रेण सु-प्रत्ययस्य लुकि कृते, तन्निमित्तकम् **यः सौ ७।२।११०।।** इति अङ्गकार्यम् नैव प्रवर्तते, अतः इदम्-शब्दस्य दकारस्य यकारादेशः अपि न भवति ।

(२) प्रत्ययस्य श्लौ कृते अङ्गकार्यनिषेधः – जुहोत्यादिगणस्य हुधातोः विहितस्य शप्-प्रत्ययस्य **जुहोत्यादिभ्यः श्लुः २।४।७५।।** इति सूत्रेण श्लुसंज्ञया लोपः क्रियते । एतादृशे लोपे कृते **प्रत्ययलोपे प्रत्ययलक्षणम् १।१।६२।।** इत्यनेन इत्यनेन शप्-प्रत्ययनिमित्तकम् **सार्वधातुकार्धधातुकयोः ७।३।८४।।** इति गुणकार्यं **न लुमताङ्गस्य १।१।६३।।** इत्यनेन निषिध्यते ।

(३) प्रत्ययस्य लुपि कृते अङ्गकार्यनिषेधः – पञ्चालानाम् निवासः इत्यस्मिन् अर्थे पञ्चाल-शब्दात् अण्-प्रत्यये कृते **जनपदे लुप् ४।२।८१।।** इत्यनेन तस्य लुप्-भवति । प्रत्ययस्य लुपि कृते, णित्-प्रत्ययनिमित्तकम् आदिवृद्धिकार्यम् अपि **न लुमताङ्गस्य १।१।६३।।** इत्यनेन निषिध्यते ।

**सप्तमीविभक्तिनिर्णयपरिभाषा**

**तस्मिन्निति निर्दिष्टे पूर्वस्य १।१।६६।।** इति सप्तमीविभक्तिनिर्णयपरिभाषासूत्रमस्ति । सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् । अर्थात् सप्तम्यर्थपदेन निर्दिष्टं

विधीयमानं कार्यम् अव्यवहितपूर्वस्य स्थाने भवति । उदाहरणार्थं **सुधी+उपास्यः** इत्यत्र त्रय इक् सकारो त्तरवर्ती उकारः, धकारोत्तरवर्ती ईकारः, उपास्यः इत्यस्य आदि उकारे समुपस्थिते सति कस्य इकः इत्यस्य स्थाने यण् स्यात् ? अस्या समस्याया निर्णयार्थम् अस्य परिभाषासूत्रस्यावश्यकता वर्तते । परिभाषासूत्रं सूत्रार्थं व्यवस्थापयति तेन अव्यवहितपूर्वस्य सुधी इत्यस्य धकारोत्तरवर्तिनः ईकारस्य इकः स्थाने यण् भवति । सकारोत्तरवर्तिन उकारस्य तु यण् नभवति । तत्र धकारस्य व्यवधानात् ।

**पञ्चमीविभक्तिनिर्णयपरिभाषा**

**तस्मादित्युत्तरस्य १।१।६७।।** इति पञ्चमीविभक्तिनिर्णयपरिभाषाविधायकसूत्रमस्ति । पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् । सूत्रेऽस्मिन् तस्मात् पञ्चम्ये कवचनान्तम् । इतीति अव्ययपदम् । उत्तरस्य पष्ठ्यैकवचनान्तम् । तदनुसारेण सूत्रस्यायमर्थः । यथा– उद् + स्थानम् इत्यत्र **उदः स्थास्तम्भोः पूर्वस्य** ८।४।६१।। इति सूत्रेण प्राप्तः पूर्वसवर्णः कस्य स्थाने स्यादिति जिज्ञासायाम् अनेन परिभाषासूत्रबलेन उदः परस्य स्था इत्यस्य स्थाने प्राप्ते सति, **अलोऽन्त्यस्य** इति सूत्रेण स्था इत्यस्य आकारस्य स्थाने प्राप्ते, तं प्रबाध्य **आदेः परस्य** १।१।५४।। इति परिभाषासूत्रबलात् विवार महाप्राणप्रयत्नवत् सकारस्य स्थाने तादृशथकारो भवति । अतः उद्+थ्+थानम् इति भवति । **झरो झरि सवर्णे** ८।४।६५ इति सूत्रेण थकारलोपे **खरि च** ८।४।५५ इति सूत्रेण चर्त्वे उत्थानम् इति रुपं सिद्धम् । अत्र अनेन सूत्रेण नियमनं क्रियते । सप्तम्यन्तेन पञ्चम्यन्तेन च पदेन निर्दिश्यमानयोः एव अन्वयो भवति । निर्दिश्यमानस्यादेशा भवन्ति । इति ।

**ह्रस्वदीर्घप्लुतादेशस्थाननिर्णयपरिभाषा**

**अचश्च १।२।२८।।** ह्रस्वदीर्घप्लुतादेशस्थाननिर्णयपरिभाषासूत्रमस्ति । ह्रस्वदीर्घप्लुतशब्दै र्यत्राज्विधीयते तत्र अचः इति षष्ठ्यन्तं पदमुपतिष्ठते । सूत्रे केवलं द्विपदमस्ति अचः, च । **ऊकालोऽज्झ्रस्वदीर्घप्लुतः** १।२।१७।। सूत्रतः अच् ह्रस्वदीर्घप्लुतः इत्यनुवर्तते । ह्रस्वदीर्घप्लुतपदस्य प्रथमाविभक्तिः तृतीयाविभक्तौ परिणता भवति । तदनुसारं ह्रस्वदीर्घप्लुतशब्दद्वारा अच्कार्ये विहिते सति सः कार्यः अच् इत्यस्योपरि स्याद् इत्यर्थो भविष्यति । ह्रस्वस्य उदाहरणं **ह्रस्वो नपुंसके प्रातिपदिकस्य** १।२।४७।। सूत्रतः ह्रस्वस्य विधानम् अच् इत्यस्य स्थाने विहितत्वाद् अतिरिकुलम् (अतिक्रान्तं रायं यत् कुलम्) । अतिरै पदावयवस्य ऐ इत्यस्य अच् कारणात् **एच इग् ह्रस्वादेशे** १।१।४८।। इत्यस्याधारोपरि ऐ इत्यस्य इ भविष्यति । दीर्घस्य उदाहरणम्– चीयते (चि+य+ते) अत्र **अकृत्सार्वधातुकयोर्दीर्घः** इत्यनेन सार्वधातुकपरे दीर्घः ची इत्यस्य ह्रस्व इकारो भविष्यति । तथैव प्लुतस्य उदाहरणं यथा– देवदत्त३ अत्र वाक्यस्य टि इति प्लुतस्य विधानफलस्वरुपमन्तिमम् (अकारम्) अज् वर्ण एव प्लुतो भविष्यति ।

**अनुदेशपद्धतिविधानपरिभाषा**

**यथासङ्ख्यमनुदेशः समानाम् १।३।१०।।** इति अनुदेशपद्धतिविधानपरिभाषासूत्रमस्ति । यत्र द्वयोः गणयोः मध्ये कस्यचन सम्बन्धस्य विधानम् क्रियते तत्र तयोः सङ्ख्या समाना अस्ति चेत् सः सम्बन्धः तयोः सदस्येषु यथासङ्ख्यम् विधीयते । यदि सूत्रे द्वयोः समसङ्ख्यकयोः गणयोः निर्देशं कृत्वा तयोः मध्ये कश्चन सम्बन्धः प्रस्थापितः दृश्यते, तर्हि सः सम्बन्धः तयोः सदस्येषु क्रमेण भवति ।

इत्युक्ते, प्रथमगणस्य यः प्रथमसदस्यः, तस्य द्वितीयगणस्य प्रथमसदस्येन सह सम्बन्धः भवति । एवमेव प्रथमगणस्य द्वितीयसदस्यस्य द्वितीयगणस्य द्वितीयसदस्येन सह भवति । इत्यादिक्रमेण प्रथमगणस्य अन्तिमसदस्यस्य द्वितीयगणस्य अपि अन्तिमसदस्येन सह एव सम्बन्धः भवति । इत्थं सः सम्बन्धः सदस्यानां क्रममनुसृत्य विधीयते । अस्मिन् सूत्रे अनुद्देशः इति शब्देन सम्बन्धः इति अर्थः विधीयते । द्वयोः गणयोः मध्ये विद्यमानः सम्बन्धः तयोः सदस्येषु यथासङ्ख्यम् भवति इति अत्र आशयः । यथा **एचोऽयवायावः ६।१।७८।।** इति सूत्रेण अयादिसन्धौ परेऽचि सति पूर्वपदान्तस्य एकारस्य स्थाने अय्, ओकारस्य स्थाने अव् ऐकारस्य स्थाने आय् औकारस्य स्थाने आव् आदेशो भवति ।

यथा-

| पूर्वशब्दस्यान्ते | परशब्दस्यादौ | पूर्वशब्दस्यान्तस्वरस्थाने |
|---|---|---|
| ए | अचि परे | अय् |
| ओ | अचि परे | अव् |
| ऐ | अचि परे | आय् |
| औ | अचि परे | आव् |

एचः क्रमाद् अय्, अव्, आय्, आव् एते स्युरचि ।[११] इति ।

**अधिकारनिर्णयपरिभाषा**

**स्वरितेनाधिकारः १।३।११।।** इति अधिकारनिर्णयपरिभाषासूत्रमस्ति । स्वरितत्वयुक्तं शब्दस्वरुपमधिकृतं बोध्यम् । अधिक्रियते इत्यधिकारः । अधिपूर्वकात् कृधातोः घञिकृते अधिकारः शब्दो निष्पद्यते । स्वरितत्वञ्च वर्णधर्मरुपम् अधिक्रियमाणपदघटक-अच्निष्ठं भवति । स च **समाहारः स्वरितः** १।२।३१।। उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् । तस्य स्वरितस्य आदितः पूर्वभागे अर्धह्रस्वउदात्त इत्यर्थः प्रतीयते ।

**अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत् ।**

**उदात्तं वोच्यते किञ्चित्स्वरितं वाक्षरं परम् ।।**[१२]

इति स्वरितस्य पूर्वभागः उदात्तः शेष उत्तरभागः अनुदात्तः प्रत्येतव्यः । अस्मिन् परिभाषासूत्रे स्वरितेन इति तृतीयैकवचनान्तम्, अधिकारः इति प्रथमैकवचनान्तम् । स्वरितो नाम स्वरविशेषो वर्णधर्मः । तेन चिह्नेन लिङ्गेनाधिकारो वेदितव्यः । स्वरितगुणयुक्तं शब्दरुपमधिकृतत्वादुत्तरत्रोपतिष्ठते । प्रतिज्ञास्वरिताः पाणिनीयाः तदेतदुक्तम्भवति यत्रैव ते आचार्याः स्वरितत्वं प्रतिजानते तत्रैवास्य सद्भावो भवति । स्वरिते सति पूर्वाधिकारुपार्थम् अग्राह्यो भवति ।

**विप्रतिषेधे सूत्रनिर्णयपरिभाषा**,

**विप्रतिषेधे परं कार्यम् १।४।२।।** इति विप्रतिषेधे सूत्रनिर्णयपरिभाषाविधायकसूत्रमस्ति । तुल्यबलसूत्रयोः समानस्थले प्राप्तिः अस्ति चेत् परसूत्रस्यैव प्रयोगो भवति । प्रक्रियायाम् द्वयोः अधिकानां वा सूत्राणाम् विप्रतिषेधे प्राप्ते तत्र ताभ्याम् परसूत्रस्य प्रयोगः तत्र प्राधान्येन भवति । यत्र द्वौ प्रसङ्गौ अन्यार्थौ, एकस्मिन् युगपत् प्राप्नुतः, सः तुल्यबलविरोधः विप्रतिषेधः । इत्युक्ते, ये द्वे सूत्रे सामान्यरुपेण भिन्नेषु स्थलेषु स्वतन्त्ररुपेण कार्यं कुरूतः, ते कुत्रचित् युगपत् प्राप्नुतः चेत् तयोर्मध्ये विप्रतिषेधः उत

तुल्यबलत्वम् अस्ति इति उच्यते। एतादृशे विप्रतिषेधे जाते तत्र अष्टाध्यायीक्रमेण अनन्तरम् स्थितस्य सूत्रस्य प्रयोगो भवति। अस्य सूत्रस्य कानिचन उदाहरणानि एतानि – **बहुवचने झल्येत् ७।३।१०३।।** तथा च **सुपि च ७।३।१०२।।** एते द्वे सूत्रे बहुषु स्थलेषु स्वतन्त्ररुपेण कार्यं कुरूतः। यथा, राम-शब्दस्य सप्तमी-बहुवचनस्य प्रक्रियायाम् सुप्-प्रत्यये परे मकारोत्तरस्य अकारस्य **बहुवचने झल्येत् ७।३।१०३।।** इति सूत्रेण एकारादेशे कृते रामेषु इति शब्दः सिद्ध्यति। अस्यां प्रक्रियायाम् **सुपि च ७।३।१०२।।** इत्यस्य प्रसक्तिरेव नास्ति, यतः सुप्-इति यञादिप्रत्ययः नास्ति। एवमेव, राम-शब्दस्य तृतीया-द्विवचनस्य प्रक्रियायाम् भ्याम्-प्रत्यये परे मकारोत्तरस्य अकारस्य **सुपि च ७।३।१०२।।** इति सूत्रेण दीर्घादेशे कृते रामाभ्याम् इति शब्दः सिद्ध्यति। अस्यां प्रक्रियायाम् **बहुवचने झल्येत् ७।३।१०३।।** इत्यस्य प्रसक्तिरेव नास्ति, यतः भ्याम्-प्रत्ययः बहुवचनस्य प्रत्ययः नास्ति। अनेन प्रकारेण **बहुवचने झल्येत् ७।३।१०३।।** तथा च **सुपि च ७।३।१०२।।** एतयोः सूत्रयोः भिन्नेषु स्थलेषु पृथग् पृथग्रूपेण प्रयोगो सम्भवति।

### पदविधौ सामर्थ्यनिरूपणपरिभाषा

**समर्थः पदविधिः २।१।१।।** इति पदविधौ सामर्थ्यनिरुपणपरिभाषासूत्रमस्ति। व्याकरणशास्त्रे उक्तः पदविधिः समर्थानाम् विषये एव भवति। यः कश्चिदिह शास्त्रे पदविधिः श्रूयते स समर्थो विदितव्यः। विधीयते इति विधिः। पदानां विधिः पदविधिः। स पुनः समासादिः। समर्थः शक्तः। विग्रहवाक्यार्थभिधाने यः शक्तः स समर्थो विधितव्यः। अथ वा समर्थपदाश्रयत्वात् समर्थः। समर्थनां पदानां सम्बद्धार्थानां संसृष्टार्थानां विधिर्वेदितव्यः। वक्ष्यति, **द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २।१।२४।।** कष्टं श्रितः कष्टश्रितः। समर्थग्रहणं किम् ? पश्य देवदत्त कष्टम्, श्रितो विष्णुमित्रो गुरूकुलम्। तृतीया **तत्कृतार्थेन गुणवचनेन २।१।३०।।** शङ्कुलया खण्डः शङ्कुलाखण्डः। समर्थग्रहणं किम् ? किं त्वं करिष्यसि शङ्कुलया, खण्डो देवदत्त उपलेन। **चतुथी तदर्थार्थबलिहितसुखरक्षितैः २।१।३६।।** यूपाय दारू यूपदारू। समर्थग्रहणं किम् ? गच्छ त्वं यूपाय, दारू देवदत्तस्य गेहे। **पञ्चमी भयेन २।१।३७।।** वृकेभ्यो भयं वृकभयम्। समर्थग्रहणं किम् ? गच्छ त्वं मा वृकेभ्यो, भयं देवदत्तस्य यज्ञदत्तात्। **षष्ठी २।२।८।।** राज्ञः पुरूषः राजपुरूषः। समर्थग्रहणं किम् ? भार्या राज्ञः, पुरूषो देवदत्तस्य। **सप्तमी शौण्डैः २।१।४०।।** अक्षेषु शौण्डः अक्षशौण्डः। समर्थग्रहणं किम् ? शक्तस्त्वं अक्षेषु, शौण्डः पिबति पानागारे। पदग्रहणं किम् ? वर्णविधौ समर्थपरिभाषा मा भूत्। तिष्ठतु दध्यशान त्वं शाकेन। तिष्ठतु कुमारी च्छत्रं हरदेवदत्तात्। यणादेशो, नित्यश्च तुग् भवति। इति।

### कृदधिकारे सप्तमीविभक्तिनिर्णयपरिभाषा

**तत्रोपपदं सप्तमीस्थम् ३।१।९२।।** इति कृदधिकारे सप्तमीविभक्तिनिर्णयपरिभाषासूत्रमस्ति। अयं उपपदसंज्ञाविधायकसंज्ञासूत्रमप्यस्ति। धातोः अस्मिन् अधिकारे विद्यमानेषु सूत्रेषु यः शब्दः सप्तमीविभक्त्या निर्दिश्यते, तेन वाचितं पदम् उपपद्संज्ञकं भवति। **धातोः ३।१।९१।।** इत्यनेन तृतीयाध्यायस्य प्रथमपादस्य द्वितीयः धात्वधिकारः प्रारभ्यते। अस्मिन् अधिकारे विद्यमानेषु सूत्रेषु यत् पदम् सप्तमीविभक्त्या निर्दिश्यते, तद्वाचकम् पदम् वर्तमानसूत्रेण उपपदुसंज्ञकं भवति। यथा- **कर्मण्यण्**

**३।२।१।।** अस्मिन् सूत्रे कर्मणि इति सप्तमीस्थं पदमस्ति, अतः **कर्मण्यण् ३।२।१।।** अस्य सूत्रस्य प्रयोगे कर्मणि इत्यनेन यस्य पदस्य निर्देशो भवति, तत् पदम् उपपदसंज्ञां प्राप्नोति। यथा, कुम्भं करोति सः अस्मिन् वाक्ये **कर्मण्यण् ३।२।१।।** अनेन सूत्रेण अण्-प्रत्ययो विधीयते। अत्र कर्मणि इति पदेन कुम्भ इत्यस्य निर्देशः क्रियते, अतः अत्र कुम्भशब्दस्य उपपदसंज्ञा भवति। अनया संज्ञया **अत्र उपपदमतिङ् २।२।१९।।** इत्यनेन उपपदसमासं कृत्वा कुम्भकार इति पदं सिद्ध्यति।

अस्मिन् सूत्रे सप्तमीस्थम् इति उच्यते। अत्र **स्थ** ग्रहणस्य प्रयोजनम् काशिकाकारः वदति- स्थग्रहणं सूत्रेषु सप्तमीनिर्देशप्रतिपत्यर्थम्।[11] इत्युक्ते, सूत्रे निर्दिष्टः सप्तम्यन्तशब्दः उत सूत्रेषु विद्यमानः सप्तमी अयं शब्दः उपपदसंज्ञां न प्राप्नोति, अपितु सूत्रेषु विद्यमानः यः सप्तम्यन्तशब्दः, तेन निर्दिष्टः शब्दः उपपदसंज्ञां प्राप्नोति। यथा, **कर्मण्यण् ३।२।१।।** इत्यत्र कर्मणी शब्दस्य उपपदसंज्ञा न भवति, अपितु कर्मणि शब्देन निर्दिष्टं यत् पदम् तस्य उपपदसंज्ञा भवति। यथा- कुम्भम् इति।

**स्वरनिर्णयपरिभाषा**

**अनुदात्तं पदमेकवर्जम् ६।१।१५८।।** इति स्वरनिर्णयपरिभाषासूत्रमस्ति। पदे यदि कश्चन स्वरः स्वरितः उदात्तः वा विधीयते, तर्हि तं स्वरं विहाय पदे विद्यमानाः अन्ये स्वराः अनुदात्ताः भवन्ति, इति सूत्रार्थः। यस्मिन्पदे यस्योदात्तः स्वरितो वा विधीयते तमेकमचं वर्जयित्वा शेषं तत्पदमनुदात्ताच्कं स्यात्। यथा- 'गोपाय' इति भ्वादिगणस्य धातुः। गुप्-धातोः 'आय' इति सनादिप्रत्यये कृते अग्रे **सनाद्यन्ताः धातवः ३।१।३२।।** इत्यनेन अस्य धातुसंज्ञा भवति। अस्य धातोः लट्-लकारस्य प्रथमपुरूषैकवचनस्य रुपमस्ति 'गोपायति' इति। अस्य रुपस्य प्रक्रियया तथा तस्याम् स्वरसञ्चारः इत्थं भवति- गुप् इत्यस्य **धातोः ६।१।१६२।।** इति सूत्रेण उकारस्य उदात्तत्वम् **गुपूधूपविच्छिपणिपनिभ्य आयः ३।१।२८।।** इति 'आय' प्रत्यये गुप्+आय इति जाते, **आद्युदात्तश्च ३।१।३।।** इत्यनेन अस्य प्रत्ययस्य आदिस्वरः उदात्तो भवति। यकारोत्तरवर्तिन अकारः तु औत्सर्गिकतया उदात्तः अस्ति। गोप्+आय इत्यत्र **पुगन्तलघूपधस्य च ७।३।८६।।** इति उपधास्वरस्य गुणादेशे गोपाय इति जाते, **सनाद्यन्ताः धातवः ३।१।३२।।** इत्यनेन 'गोपाय' इत्यस्य धातुसंज्ञा, अतः यकारोत्तरः अकारः **धातोः ६।१।१६२।।** इति उदात्तः जायते। ततः **अनुदात्तं पदमेकवर्जम् ६।१।१५८।।** इति सूत्रेण गो इत्यस्य ओकारस्य पा इत्यस्य आकारस्य च अनुदात्तं भवति।

**निष्कर्षः**

साक्षाच्छक्तिग्राहकत्वं सञ्ज्ञात्वम्। शक्तिग्रहणञ्च कश्चिद् व्यवहारमेवोद्दिश्य सम्भवति। व्यवहारार्थं शास्त्रे कृतो यः सङ्केतः स एव सञ्ज्ञापदेनोच्यते। स्वल्पाक्षरयुक्तं सन्देहरहितं सारवद् विस्तृतविवरणकारकं दोषरहितम् अस्तोभं श्रद्धेयं वा पदं सूत्रं भवति। सञ्ज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकार भेदात् सूत्राणि षड्विधानि समुपलभ्यन्ते। पाणिनिनाष्टाध्याय्यां सूत्ररुपेण पठिताः, अन्यसूत्रादितो ज्ञापिताः न्यायसिद्धप्रभृतयः, लोकविदितत्वात्प्राप्ताः सूत्रवत् प्रमाणत्वेन स्वीकृताः परिभाषाः विधिसूत्रेषु यथास्थानं प्रयुज्यन्ते। पाणिनिना अष्टाध्याय्यां शब्दानुशासनं नियमयितुं प्रायेण पञ्चाशन्मितानि परिभाषासूत्राणि प्रणीतानि, तानि विविधेषु अध्यायेषु पादेषु च विकीर्णनि सन्ति। वार्तिककारेण कात्यायनेनाऽपि प्रायेण

एकचत्वारिंशन्मितानि परिभाषावार्तिकानि प्रणीतानि सन्ति । एवमेव नागेशभट्टमहाभागेनाऽपि परिभाषे न्दुशेखरनामके ग्रन्थे शास्त्रत्वसम्पादनोद्देशप्रकरणे सप्तत्रिंशत्, बाधबीजप्रकरणे चतुस्त्रिंशत्, शास्त्रशे षप्रकरणे द्विषष्टीसङ्ख्यकाः परिभाषाः कृत्वा त्रयस्त्रिशताधिकशतसङख्यकाः परिभाषाः विरचिताः सन्ति । पाणिनीयाष्टाध्याय्यां प्रयुक्तानां परिभाषाविधायकसूत्राणां परिशीलनक्रमेऽत्र चतुर्विंशतिसङ्ख्याकानां परि भाषासूत्राणां चर्चा विहिता । तेषामर्थविवेचनपूर्वकमुदाहरणानि चात्र प्रदर्शितानि । छात्राणां सुखबोधायात्र परिभाषासूत्राणां सरलतया सोपपत्तिकञ्च विश्लेषणं विहितम् ।

### सन्दर्भसामग्रीसूची

ऋग्वेदसंहिता, भट्टाचार्यः श्रीपादशर्मा, (सम्पा.), औन्ध्रनगर : स्वाध्यायमण्डलः, १९४० ।

कैयटः, **भाष्यप्रदीपः**, गुरूप्रसादशास्त्री (संस्क.), नन्दकिशोर शास्त्री (सम्पा.), दिल्ली : प्रतिभा प्रकाशन, सन् १९९९ ।

गौड, अशोकचन्द्रशास्त्री, **वैयाकरणप्रबन्धमुक्तावली**, दिल्ली : नाग पब्लिशर्स, प्रथम संस्करण, सन् २००५ ।

झा, उदयशङ्करः, **अधिगमकौमुदी**, वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०१३ ।

द्विवेदी, जानकीप्रसादः, **कातन्त्रव्याकरणविमर्शः**, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वि.सं. २०३२ ।

नागेशभट्टः, **परिभाषेन्दुशेखरः**, केशवशरणोपाध्यायः (टीकाकारः), दिल्ली : अभिषेक प्रकाशन, वि.सं. २०७६ ।

**परिभाषेन्दुशेखरः**, **विजयाटीका**, जयदेवमिश्रः ।

पतञ्जलिः, **व्याकरणमहाभाष्यम्**, नवाह्निकम्, सम्पादक, मधुसूदनप्रसाद मिश्र, वाराणसी : चौखम्वा विद्या भवन, पुनर्मुद्रित संस्करण २००३ ।

--------- **व्याकरणमहाभाष्यम्**, कैयटप्रणीतेन भाष्यप्रदीपेन, नागेशविरचितेन भाष्यप्रदीपोद्योते न, भाष्यव्याख्यानभूतेन भट्टोजिदीक्षितविरचितेन शब्दकौस्तुभेन च विराजितः, संस्कर्ता गुरूप्रसादशास्त्रिः, सम्पादकः नन्दकिशोरशास्त्रिः, दिल्ली : प्रतिभा-प्रकाशनम्, १९९९ ।

पाणिनिः, **अष्टाध्यायी**, सरलव्याख्याटीकालङ्कृता, गुरूप्रसादशास्त्री, वाराणसी : भार्गव पुस्तकालय, सन् २००२ ।

**पाराशरोपपुराणम्** कपिलदेवत्रिपाठी (सम्पा.), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वि.सं. २०४६ ।

भट्टोजिदीक्षितः, **सिद्धान्तकौमुदी**, बालमनोरमा टीका, (च.सं.), गोपालदत्तपाण्डेयः (सम्पा.) वाराणसी : चौखम्वा-सुरभारती-प्रकाशनम्, १९९९ ।

--------- **सिद्धान्तकौमुदी**, तत्त्वबोधिनीव्याख्यासंवलिता (व्याख्या.) वासुदेवशर्मा, नयाँ दिल्ली :

लालबहादुरशास्त्रि–राष्ट्रिय–संस्कृत–विद्यापीठम्, २००९ ।

----------- **सिद्धान्तकौमुदी**, लक्ष्मीटीका, (व्याख्या.) सभापतिशर्मा, (प्र.सं) द्वितीयांशः, बालकृष्णशर्मा (सम्पा.), वाराणसी : मोतीलाल बनारसी दास, १९६६ ।

मीमांसकः, युधिष्ठिरः, **संस्कृत व्याकरणशास्त्र का इतिहास**, हरयाणा : शान्तिस्वरुप कपूर, रामलाल कपूर ट्रष्ट प्रेस, २०४१ ।

यास्कः, **निरुक्तम्**, (प्रथमोभागः), श्रीसत्यव्रतसामश्रमिभट्टाचार्यः (सम्पा.), कलकत्ता : एशियन सोसाइटि अफ बङ्गाल, १८८२ ।

वरदराजः, **लघुसिद्धान्तकौमुदी**, **भैमीव्याख्या**, (अष्टम संस्करण) व्याख्याकारः भीमसेनशास्त्री, दिल्ली : भैमी प्रकाशन, सन् २०१४ ।

----------- **लघुसिद्धान्तकौमुदी सुबोधिनी नेपालीटीका**, टीकाकारः दुर्गादत्तशर्मा उपाध्यायः, दाङ : महेन्द्रसंस्कृतविश्वविद्यालयः, वि.सं. २०५७ ।

वररूचिः, **कविकल्पद्रुमः १।१।१।**

वामनजयादित्यौ, **काशिकावृत्तिः**, न्यास-पदमञ्जरीभावबोधसहिता (प्रथमो भागः), सम्पादकौ जयशङ्कर लालत्रिपाठि-सुधाकरमालवीयौ च, वाराणसी : तारा प्रिन्टिङ वर्क्स, २०४२ ।

सरस्वती, श्रीशचन्द्रः **अष्टाध्यायीकाशिकान्यासः १**, प्रस्तावनायाम् ।